उत्तरपदस्थः बहु० । उपमायुक्ते यथा वज्रप्रख्यः इत्यादि

**प्रख्यात** त्रि० प्र+ख्या—क्त । विख्याते सुप्रसिद्धे ।

**प्रख्यातवप्तृक** पु० प्रख्यातो वप्ता जनयिता यस्य कप् । विख्यातपितृके असुपत्रपुत्रे हेमच० ।

**प्रख्यास्** पु०प्र+चक्ष- असि 'बहुलं शिच्' इत्युक्तेर्न शित् तेन ख्यादेशः । प्रजापतौ उज्ज्वल० ।

**प्रगण्ड** पु० गडि—वदनैकदेशे अच् प्रकृष्टो गण्डः अवयवः प्रा०स० । १कूर्परोपरिकक्षपर्य्यन्तभागे अमरः । दुर्गप्राकारभित्तौ २भूराणां निवेशनस्थाने च स्त्री गौरा० ङीष् । "सञ्चारो यत्र लोकानां दूरादेवावबुध्यते । प्रगण्डी सा च विज्ञेया बहिःप्राकारसंश्रिता । प्रणिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता । स एवाकाशरक्षीति प्रोच्यते शस्त्रकोविदैः" भा०टी०धृतवाक्यम् । "प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तथा" भा० शा० ६९ अ० । "प्रगण्डीर्दुर्गप्राकारभित्तौ भूराणामुपवेशनस्थानानि । आकाशजननीस्तत्रैवैकक्षायां भित्तौ तत्रत्यानां रक्षणभूतायां बाह्यार्थदर्शनार्थानि क्षुद्रच्छिद्राणि यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते"नीलकण्ठः ।

**प्रगतजानु(क)** त्रि० प्रगते परस्परमसंश्लिष्टे जानुनी यस्य वा कप् । असंहतजानुके प्रज्ञौ यस्य जानुनोर्मध्ये महदन्तरालं तस्मिन् अमरः । युक्ते त्रि० ।

**प्रगन्ध** पु० प्रकृष्टो गन्धोऽस्य । १पर्पटे राजनि० । २प्रकृष्टगन्ध-

**प्रगल्भ** त्रि० प्र+गल्भ—अच् । १प्रत्युत्पन्नमतौ २प्रतिभान्विते च अमरः । ३नायिकाभेदे स्त्री तल्लक्षणादि नायिकाशब्दे ४०४२ पृ० दृश्यम् ।

**प्रगल्भता** स्त्री प्रगल्भस्य भावः तल् । १औद्धत्ये २उत्साहे च हेमच० । "निःशङ्कता प्रयोगेषु बुधैरुक्ता प्रगल्भता" उज्ज्वलमण्युक्ते प्रयोगेषु ३निःशङ्कत्वे च ४प्रतिभान्वितत्वे च ।

**प्रगाढ़** त्रि० प्रकर्षेण गाढ़म् गाहू—क्त । १अत्यन्तभृशे २कृच्छ्रे च अमरः । ३दृढ़े भरतः ।

**प्रगातृ** त्रि० प्र+गै तृच् । उत्तमगायके शब्दरत्ना० ।

**प्रगाथ** पु० प्र+ग्रन्थ—बा० आधारे घञ् "छन्दसः प्रगाथेषु" निर्देशात् नि०नरयोर्लोपे उपधावृद्धिः । वेदे द्वे ऋचौ यत्र तिस्रः क्रियन्ते १तत्राथे विस्तरस्तु सामसंहिताभाष्ये दृश्यः । दिङ्मात्रं ततः समाहृत्येहोच्यते । "काकुभः प्रगाथः" इत्यत्र प्रगाथशब्दार्थपर्य्यालोचनेनापि ग्रथनं गम्यते प्रकर्षेण ग्रथनं यत्र स प्रगाथः प्रकर्षो नाम आम्नाताहक्पाठादाधिक्यम्, तच्च पूर्वोक्तरीत्या पादाभ्यासपुरःसरस्तृगन्तरसम्पादनेनोपजायते । तस्मात्रोत्पत्तिककुभौ पठितव्ये किन्तर्हि प्रग्रथेन द्वे उत्तरे ककुभौ सम्पाद्य तासु तिसृषु रथन्तरं गातव्यम् । रौधसनामकं किञ्चित् साम तथा यौधाजयनामकमपरम् तयोः साम्नोर्वृहतीच्छन्दस्कास्तृच आश्रय इति उत्तरापन्थे तु तस्य सामद्वयस्याश्रय एकः प्रगाथः आम्नातः तस्मिंश्च प्रगाथे पुनानः सोमेत्यसावृक् प्रथमा सा च वृहती "दुहान ऊधर्दिव्यमिति" द्वितीया सा तु विष्टारपङ्क्तिः तामेतां विष्टारपङ्क्तिमपनीय तस्याः स्थाने उत्पत्तिवृहत्यौ द्वे ऋचौ आनेतव्ये इति पूर्वपक्षः । वृहतीविष्टारपङ्क्त्योः प्रग्रथनविशेषेण द्वे वृहत्यावुत्तरे सम्पादनीये इति राद्धान्तः । प्रगाथत्वेन ध्येये २मन्त्रे च यजु०१९।२४वेददी०

**प्रगुण** त्रि० प्रस्तुतो गुणो यत्र प्रकृष्टो गुणो यस्य वा प्रा०ब०। १ऋजुतावति २दक्षे च अमरः । प्रकृष्टगुणोऽप्यत्र ।

**प्रगृह्य** न० प्र+ग्रह—क्यप् । व्याकरणोक्ते स्वरसन्धिराहित्ययोग्ये १पदभेदे २स्मृतौ ३वाक्ये च अमरः ।

**प्रगे** अव्य० प्रगीयतेऽत्र प्र+गै—के । अतिप्रातःकाले अमरः । तत्र भवः ष्यु तुट् च । प्रगेतन प्रातर्भवे त्रि० राजनि०

**प्रगेनिशा** त्रि०प्रगे प्रातःकालो निशेव स्वापहेतुर्यस्य । प्रातःकालशायिनि । "उत्सूर्य्यशायिनश्चासन् सर्वे चासन् प्रगेनिशाः" भा०शा० २२८अ० ।

**प्रग्रथन** न० प्रकर्षेण ग्रथने । प्रगाथशब्दे दृश्यम् ।

**प्रग्रह** पु०प्र+ग्रह कर्मकरणादौ यत्ने अप् । १तुलासूत्रे २हयादिसंयमनरज्ज्वौ ३वन्द्यां च अमरः । ४नियमने ५भुजे ६सुवर्णालङ्कारे मेदि० । ७कर्णिकारवृक्षे राजनि० । प्र+ग्रह—कर्त्तरि अच् । ८विष्णौ "प्रग्रहो निग्रहो व्यग्रः" विष्णुस० "भक्तैरुपाहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः"भा० । [२हयादिसंयमनदामनि च अमरः ।

**प्रग्राह** पु० प्र+ग्रह—कर्मकरणादौ वा घञ् । १तुलासूत्रे

**प्रग्रीव** पु०न०प्रकृष्टा ग्रीवा यस्य । १गृहादौ प्रान्तधार्य्यदारुपङ्क्तौ २वातायने सुभूतिः ३वृक्षशीर्ष्यके गोवर्द्धनः । ४प्रकृष्टग्रीवान्विते त्रि० ।

**प्रघटाविद्** पु०प्रकृष्टा घटा आडम्बरः तां वेत्ति विद्—क्विप् । शास्त्रगण्डे शास्त्राभिज्ञे त्रिका० ।

**प्रघट्टक** पु० प्र+घट्ट—ण्वुल् । एकार्थप्रतिपादनार्थग्रन्थावयवभेदे शां०सू०भाष्ये दृश्यम् ।

**प्रघ(घा)ण(न)** पु० प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते